Indra's wife 3. Indra's son.

1 2 3 1
इन्द्राणी पौलोमी शची जयन्तश्च तत्सुतो ज्ञेयः ।

Indra's city 1. Indra's garden 1.

1 1
अमरावती च नगरी नन्दनमुद्यानमिन्द्रस्य ॥ ५५ ॥

Indra's thunderbolt 12.

1 2 3 4 5 6
पविरशनिः शतधारं वज्रं कुलिशं च भवति दम्भोलिः ।
7 8 9 10 11 12 a
गौभिदुरं व्याधामः स्वरुरिन्द्रप्रहरणं तथा शम्बः ॥ ५६ ॥

Clap of thunder 2. The flash of lightning 2.

1 2 1 2
स्फूर्जथुर्वज्रनिर्घोषो वज्रज्वालाऽतिभीः स्मृता ।

Indra's bow, rain-bow. } 3.

1 2 3
ऋजु रोहितमिच्छन्ति बुधाः शक्रशरासनम् ॥ ५७ ॥

A cloud 10.

1 2 3 4 5 6
अभ्रमब्दो घनो मेघः स्तनयित्नुः पयोधरः ।
7 b 8 9 10
धाराधरो धूमयोनिर्जीमूतश्च बलाहकः ॥ ५८ ॥

Heavy fall of rain 2. Rain driven by wind 2.

1 2 1 2
धारासम्पात आसारो वातास्तं वारिसीकरः ।

The cloudy day 2. Hail 2.

1 2 c 1 2
दुर्दिनं मेघतिमिरं करकः स्याद्घनोपलः ।

A series of clouds 2.

d 1 2
चलन्नवाभ्रमाला च बुधैः कादम्बिनी स्मृता ॥ ५९ ॥

Lightning 10.

1 2 3 4 e 5 6 7
शम्पा चपला क्षणिका शतह्रदा ह्लादिनी तडिद्विद्युत् ।
8 9 10
सौदामिन्यचिरांशुः प्राज्ञैरैरावती च विज्ञेया ॥ ६० ॥

Indra's elephant 3.

1 2 3
ऐरावतोऽभ्रमातङ्गः स चैरावण उच्यते ।

Indra's horse 2. Indra's charioteer 2.

1 2 1 2
उच्चैःश्रवास्तु देवाश्वो मातलिः शक्रसारथिः ॥ ६१ ॥

Fire 39.

1 2 3 4 5 6 7
सप्तार्चिर्बहुलः शिखी हुतवहो वैश्वानरोऽग्निर्वसु-
8 9 10 11 f 12
र्वह्निर्वायुसखः सितेतरगतिः स्वाहाप्रियः पावकः ।
13 14 15 16 17 18
अर्चिष्मान् ज्वलनः कृशानुरनलो धूमध्वजो हव्यवाट्,
19 20 21 22 23
बर्हिर्ज्योतिरुषर्बुधश्च दहनः स्याच्चित्रभानुः शुचिः ॥ ६२ ॥

a सम्ब शम्बुः, शबुः b धूमज्योति c कर्कस्तु, करका d चरभ्रमाला
e ह्वादिनी, ह्रादिनी f स्वाहापतिः ।